# Vrindavanadvadashivratam

# વૃન્દાવનદ્વાદશીવ્રતમ્

## Document Information

Text title : vRRindAvanadvAdashIvratam

File name : vRRindAvanadvAdashIvratam.itx

Category : devii, tulasI, devI, dvAdasha

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar

Description-comments : tulasI viShNu vivAhavidhi, sanatkumArasaMhitA

Acknowledge-Permission: Mahaperiaval Trust

Latest update : June 12, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# વૃન્દાવનદ્વાદશીવ્રતમ્

(વ્રતચૂડામણૌ )
તુલસી વિષ્ણુવિવાહવિધિઃ
દેશકાલૌ તતઃ સ્મૃત્વા ગણેશં તત્ર પૂજયેત્ ।
પુણ્યાહં વાચયિત્વાઽથ નાન્દીશ્રાદ્ધં સમાચરેત્ ॥ ૧॥

વેદવાદ્યાદિનિર્ઘોષૈઃ વિષ્ણુમૂર્તિં સમાનયેત્ ।
તુલસ્યા નિકટે સા તુ સ્થાપ્યા ચાન્તર્હિતા ઘટૈઃ ॥ ૨॥

આગચ્છ ભગવન્ દેવ અર્હયિષ્યામિ કેશવ ।
તુભ્યં દદામિ તુલસીં સર્વકામપ્રદો ભવ ॥ ૩॥

દદ્યાદ્ દ્વિવારમર્ઘ્યં ચ પાદ્યં વિષ્ટરમેવ ચ ।
તતશ્ચાચમનીયં ચ ત્રિરુક્ત્વા ચ પ્રદાપયેત્ ॥ ૪॥

પયો દધિ ઘૃતં ક્ષૌદ્રં કાંસ્યપાત્રપુટે ધૃતમ્ ।
મધુપર્કં ગૃહાણ ત્વં વાસુદવ નમોઽસ્તુ તે ॥ ૫॥

તતો યે સ્વકુલાચારાઃ કર્તવ્યા વિષ્ણુતુષ્ટયે ।
હરિદ્રાલેપનાભ્યઙ્ગઃ કાર્યઃ સર્વં વિધાય ચ ॥ ૬॥

ગોધૂલિ સમયે પૂજ્યૌ તુલસીકેશવૌ પુનઃ ।
પૃથક્પૃથક્તતઃ કાર્યૌ સમ્મુખં મઙ્ગલં પઠેત્ ॥ ૭॥

ઇષ્ટદેશે ભાસ્વરે તુ સઙ્કલ્પં તુ સમર્પયેત્ ।
સ્વગોત્રપ્રવરાનુક્ત્યા તથા ત્રિપુરુષાદિકમ્ ॥ ૮॥

અનાદિમધ્યનિધન ત્રૈલોક્યપ્રતિપાલક ।
ઇમાં ગૃહાણ તુલસીં વિવાહવિધિનેશ્વર ॥ ૯॥

પાર્વતી બીજસમ્ભૂતાં વૃન્દાભસ્મનિ સંસ્થિતામ્ ।
અનાદિમધ્યનિધનાં વલ્લભાં તે દદામ્યહમ્ ॥ ૧૦॥

પયોઘૃતૈશ્ચ સેવાભિઃ કન્યાવદ્વર્ધિતાં મયા ।
ત્વત્પ્રિયાં તુલસીં તુભ્યં દાસ્યામિ ત્વં ગૃહાણ ભોઃ ॥ ૧૧॥

એવં દત્વા તુ તુલસીં પશ્ચાત્તૌ પૂજયેત્તતઃ ।
રાત્રૌ જાગરણં કુર્યાત્ વિવાહોત્સવપૂર્વકમ્ ॥ ૧૨॥

પ્રતિવર્ષમિદં કુર્યાત્ કાર્તિકવ્રતસિદ્ધયે ।
તતઃ પ્રભાતસમયે તુલસીં વિષ્ણુમર્ચયેત્ ॥ ૧૩॥

વહ્નિ સંસ્થાપનં કૃત્વા દ્વાદશાક્ષરવિદ્યયા ।
પાયસાજ્ય ક્ષૌદ્રતિલૈઃ હુનેદષ્ટોત્તરં શતમ્ ॥ ૧૪॥

તતઃ સ્વિષ્ટકૃતં હુત્વા દદ્યાત્પૂર્ણાહુતિં તતઃ ।
આચાર્યં ચ સમભ્યર્ચ્ય હોમશેષં સમાપયેત્ ॥ ૧૫॥

ચતુરો વાર્ષિકાન્માસાન્ નિયમં યસ્ય યત્કૃતમ્ ।
કથયિત્વા દ્વિજેભ્યસ્તત્ તથાઽન્યત્પરિપૂજયેત્ ॥ ૧૬॥

ઇદં વ્રતં મયા દેવ કૃતં પ્રીત્યૈ તવ પ્રભો ।
નૂનં સમ્પૂર્ણતાં યાતુ ત્વત્પ્રસાદાત્ જનાર્દન ॥ ૧૭॥

રેવતીતુર્યચરણે દ્વાદશીસંયુતે નરઃ ।
ન કુર્યાત્પારણાં કુર્વન્ વ્રતં નિષ્ફલતાં વ્રજેત્ ॥ ૧૮॥

તતો યેષાં પદાર્થાનાં વર્જનં તુ કૃતં ભવેત્ ।
ચાતુર્માસ્યેઽથવા તૂર્જે બ્રાહ્મણેભ્યઃ સમર્પયેત્ ॥ ૧૯॥

તતઃ સર્વં સમશ્નીયાત્ યદ્યદુક્તં વ્રતે સ્થિતઃ ।
દમ્પતિભ્યાં સહૈવાત્ર ભોક્તવ્યં વા દ્વિજૈઃ સહ ॥ ૨૦॥

તતો ભુક્તોત્તરં યાનિ ગલિતાનિ દલાનિ ચ ।
તુલસ્યાસ્તાનિ ભુક્ત્વા તુ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૨૧॥

ભોજનાનન્તરં વિષ્ણોરર્પિતં તુલસીદલમ્ ।
ભક્ષણાત્પાપનિર્મુક્તિઃ ચાન્દ્રાયણ શતાધિકમ્ ॥ ૨૨॥

ઇક્ષુખણ્ડં તથા ધાત્રીફલં પૂગીફલં તથા । ।
ભુક્ત્વા તુ ભોજનસ્યાન્તે તસ્યોચ્છિષ્ટં વિનશ્યતિ ॥ ૨૩॥

એષુ ત્રિષુ ન ભુક્તં ચેદૈકકમપિ યેન તુ ।
જ્ઞેયં ઉચ્છિષ્ટ આવર્ષં નરોઽસૌ નાત્ર સંશયઃ ॥ ૨૪॥

તતઃ સાયં પુનઃ પૂજ્યૌ ઇક્ષુવંશૈશ્ચ મણ્ડિતૌ ।
તુલસીવાસુદેવૌ ચ કૃતકૃત્યો ભવેત્તતઃ ॥ ૨૫॥

તતો વિસર્જનં કુર્યાત્ દત્વા દેયાદિકં હરેઃ ।
વૈકુણ્ઠં ગચ્છ ભગવન્ તુલસ્યા સહિતઃ પ્રભો ॥ ૨૬॥

મત્કૃતં પૂજનં ગૃહ્ય સન્તુષ્ટો ભવ સર્વદા ।
ગચ્છ ગચ્છ સુરશ્રેષ્ઠ સ્વસ્થાનં પરમેશ્વર ॥ ૨૭॥

યત્ર બ્રહ્માદયો દેવાઃ તત્ર ગચ્છ જનાર્દન ।
એવં વિસૃજ્ય દેવેશં આચાર્યાય પ્રદાપયેત્ ॥ ૨૮॥

મૂર્ત્યાદિકં સર્વમેવ કૃતકૃત્યો ભવેન્નરઃ ।
પ્રતિવર્ષં કરોત્યેવં તુલસ્યુદ્વાહનં શુભમ્ ॥ ૨૯॥

ઇહ લોકે પરત્રાપિ વિપુલં સદ્યશો ભવેત્ ।
પ્રતિવર્ષં તુ યઃ કુર્યાત્ તુલસીકરપીડનમ્ ।
ભક્તિમાન્ ધનધાન્યૈશ્ચ યુક્તો ભવતિ નિશ્ચિતમ્ ॥ ૩૦॥

ઇતિ સનત્કુમારસંહિતાન્તર્ગતમ્ વૃન્દાવનદ્વાદશીવ્રતં સમ્પૂર્ણમ્ ।

Encoded and proofread by Shree Devi Kumar

*Vrindavanadvadashivratam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*